॥ श्री गुरुभ्यो नमः ॥ ॥ श्री महा गणाधिपतये नमः ॥

# ॥ श्री स्कंदवेदपाद स्तोत्रम् ॥

पुरा स्कंदो महाबाहुः प्राप्य कौमारजांगलं ।
कुमाराद्रि समासाध्य जित्वा तारकमोजसा ॥१॥
वासुकिं भुजगेंद्रं च कृत्वा पूर्णमनोरथं ।
स्वांशं तस्मिन् प्रतिष्ठाप्य धारातीरे मनोरमे ॥२॥
देवभूदेव संघैश्च देवानीकयुतो वशी ।
सुरेंद्रयाज्ञया तस्य कन्यां स्वीकृत्य तत्रहि ॥३॥
स्वामिकार्तिकमासाद्य तां विवाह महोत्सवेः ।
तत्रस्थितं मोदमानमानसं मणिमंदिरे ॥४॥
देवसेना पतिस्वांगहर्षं चापि सुधाकरं ।
स्वच्छस्फटिक निर्माणदिव्यसिंहासनेस्थितम् ॥५॥
सर्वक्षेत्रोत्तमे नित्यं भोगमोक्षफलप्रदे ।
महासारस्वतेपीठे स्वगणे स्वामि कार्तिके ॥६॥
दृष्ट्वातुपरमानंदयुताः सेंद्रायुताः सुराः ।
कृतांजलि पुटाः सर्वेतुष्टुवुर्मुदितास्तदा ॥७॥
वरोत्पलस्रक्करकारविंद संशोभिहस्तां कुचभारनम्रां ।
बिंबाधरां रक्तनखां तलोदरीं हरींद्रमध्यां गजमंदगामिनीम् ॥८॥
भृंगालकां श्यामलदेहकांतिं मुक्तावलीभूषितकंठभागां ।
महार्हवस्त्राभरणैरु पेतां विद्युत्प्रभां कोमलपादपद्माम् ॥९॥
राकाशरश्चंद्रमुखीं मनोज्ञां मंदस्मितां कुंददतीं सुनासां ।
तत्र स्पुरन्मौक्तिकचारुकांतिं प्रभातिरस्कारकृतेंदु मं(द)(ड)लाम् ॥१०॥
प्रियसमालिंगनजात–संभ्रमभ्रमद्विलासोत्थित रोमहर्षणां ।
स्रवत्सुधा–सागरपूर्णचन्द्रकटाक्षकल्लोल विलासविभ्रमाम् ॥११॥

तां देवसेनां परिरभ्यं गाढं लज्जानता मुन्नमयन् कराब्जैः ।
वचोभिरीर्ष्या प्रणयप्रकोपैः सम्मानयन्हास्यसमन्विताभि ॥१२॥
कथोरमार्तांड सहस्र कान्तिमत्कीरटभाभासिद दिग्वधूमुखं ।
सुच्छरचन्द्रमरी चिदिक्कृत प्रदीप्तसौम्यननमन्डलं प्रभुम् ॥१३॥
चलत्कपोलांत विराजितोज्ज्वलस्फुरत्सुमुक्तामणिवर्यकुन्डलं ।
प्रहर्ष कृद्धक्तचरोमन्डलं स्मेरास्यजैवातृककौमुदी कम् (मुखं)॥१४॥
बिंबाधरं सुन्दरकंबुकंधरं दिव्यायुधोद्यद्भुजदंडम म्भतं ।
आजानुबाहुं सुविशालवृक्षसं पीनोन्नतांसं विमलांगकान्तिम् ॥१५॥
गंभीरनाभिं सुकटिप्रदेशं सुजानु जंघं मृदुपाद पल्लवं ।
महारत्नांगदषट्किरीटं द्विषड्भुजं चित्रमयूरवाहनम् ॥१६॥
तेजः क्षमाबुद्धियशोभिरेव समं धरित्री गुरुशुक्रसूरैः ।
गजाख्यसिंहानन शूरपद्मसतारकाग्निप्रळयांबुराशिम् ॥१७॥
रक्षो–गणादिष्ठित पारिसंस्थतद्वीरमाहेन्द्रसुदुर्गभेधनं ।
गन्धर्वगीर्वाण सुसिद्धसाध्य विद्याधरैरप्सरोभीश्च सेव्यम् ॥१८॥
मुनींद्र पद्मासन वारिजाक्ष भूतेशमुख्यैर्वर चारुकन्दम् ।
धारासरित्तीरविराजमाना कुमारशैलाग्र सुदिव्यधाम्नि ॥१९॥
स्थितं स्वशक्त्यापरया सुरूपया तं देवसेनासहितं वरेण्यं ।
मग्जाच्छहन्तारमनन्तशक्तिं षडाननं वांछितदा नदक्षम् ॥२०॥
गौरीवरानंकरं सुचारुवेषं सुविद्याप्रदमाश्रितानां ।
नित्यान्नदाने सिरुतं महोग्रकुष्ठादिहन्तारमनादिनिर्गुणत ॥२१॥
देवांगनाभिर्मुनिकन्यकाभिर्नीराजितं मंगलमंगलांगुं ।
बिलान्तराळस्तितवासुकीन्द्रे स्वांशेन तिष्थन्तमुदार विक्रम ॥२२॥
सर्वेश्वरं त्रिपुरसुन्दरमादिदेवं जन्मातिगं भवभयापहरं वरेण्यं ।
गंगासुतं गिरिसुतां मुदामावहन्तं वन्दामहे मयभीष्टदमाशुद्ध्यै ॥२३॥

इति स्तुतं देवगणैरावाङ्मनसगोचरं ।
कालं कलयतां स्तुत्यं स्तुति रूपं स्तुतिप्रियम् ॥२४॥
प्रणम्य दन्डवद्भूमौ वेदान्तस्तवमुत्तमं ।
पठेदिदं स्वांतपद्मे चिन्तयन् स्वंद वीश्वतम् ॥२५॥
गजाननं महात्मानं सुधाकुंभं वरांकुशौ ।
बिभ्राण मोदक हस्तैर्नमस्कृत्यकिरीटनम् ॥१॥
श्रीपतिस्तुतचारित्र श्री मत्सुंदर विग्रह ।
श्रीषडाननर्सेश श्रीयं वासयमेकुले ॥२॥
पुरन्दरादिसंसेव्यपादपद्मदयानिधे ।
पुळिंदकन्या रमण पुरुत्राह्यसिविश्रुतः ॥३॥
वीतरागाश्चमुनयो हृदंबुजपुटेस्थितं ।
सर्वज्ञंसर्वगं स्कंदं सदापश्यंति सूरयः ॥४॥
यमाश्रित्य च गीर्वाणा युधि शत्रून्निहन्ति च ।
आलंबन्ति स्वपदवीं तिष्ठन्तिस्वादु रातयः ॥५॥
द्विषड्भुजगदाखेट पाश खड्गादि हेतिभिः ।
विद्रावयाशुमेशत्रून् संग्रामेरिपुसंकटे ॥६॥
तापत्रय महावह्नि ज्वालासन्तापपितं हि मां ।
तथा कामादि षड्वर्गैराप्यायस्वसमेतुतेः ॥७॥
अणोरणी यां समजमेकं धातरमीश्वरं ।
मयूरवाहनं देवं विपश्येमनृचक्षसः ॥८॥
मन्दस्मितमुखांभोजं युवानं क्रौंचभेदिनं ।
समाश्रयित्वा विबुधा मुदप्रमुदाअसते ॥९॥
महासाम्राज्यपीठस्थं राजराजनमद्युतिं ।
क्षिप्रमालोकयिष्यामः सुगंधिं पुष्टिवर्धनम् ॥१०॥

कायेनमनसावाच नतिचिन्तनकीर्तनैः ।
सदारा हृष्टमनसश्चोपास्मैगायतानरः ॥११॥
नमोहिरण्यवर्णाय हिरण्यस्यंदनायच ।
नमो हिरण्यगात्राय नमोहिरण्यबाहवे ॥१२॥
दंडिताखिलदैत्यौघः खन्डिताखिलबंदनः ।
वर्धितानुत भक्तौघः शन्नः करत्यर्वते ॥१३॥
गिरिजासुकुमाराय वराभयंकराय च ।
भद्रदाय वरेण्याय विश्वरूपायवै नमोनमः ॥१४॥
अपराधान्य नन्तानि कृतानि बहुदा मया ।
मदीय इति मत्वातं रक्षस्वमांजदेपदे ॥१५॥
दारि द्यांबुधि मग्नं मां शंमेनस्व पाणिना ।
समुद्धृत्यच गांगेय कीर्तिमृद्धिं ददातुमे ॥१६॥
आन्यत्सर्वं परित्यज्य पदाज्जयुगळं तव ।
समाश्रीतोस्मि भगवान् कक्षाणोब्रह्मणस्पते ॥१७॥
यष्चव्योसित्वमेवेश विधि मन्त्र पुरस्कृतं ।
नियतं हि द्विजात्यग्रैरस्मिन्यज्ञेस्वध्वरे ॥१८॥
लोतापस्मारकुष्ठाहिराजचोराद्युपद्रवान् ।
कृतिकातनयास्माकं भिंधि द्वेषः सहस्कृतः ॥१९॥
त्वत्सेवानिरतानां हि भवंत्सा खन्डलश्रियः ।
अतस्त्वामेव मुनयः संजानाना उपासते ॥२०॥
यज्ञानां फलदाता त्वं यज्ञोपकरणानि च ।
त्वं होता यजमानश्च त्वं सोमासि सत्फतिः ॥२१॥
देवसेना समेतस्त्वं क्रिडसे मणिमंदिरे ।
स्वगणैश्च महासेनयत्रतत्परमं पदम् ॥२२॥

भ्राजद्गंडस्थळोद्धाम कुन्डलोज्ज्वलिताननं ।
बिभ्रतखंडेदुनयंपश्येम शरदः शतम् ॥२३॥
प्राप्यतारकदैत्येन्द्रोद्भव सागरतारकं ।
संसारसागरं तीर्त्वा देवो देवेभिरागमत् ॥२४॥
स्तुत्वा महान्तं महतोह्यणी यांसमणोरपि ।
मोदिष्यामोवयं नित्यं प्रजया चधने न च ॥२५॥
बालक्रीडां विकुर्वाणो बालभास्करदीप्तिमान् ।
बालेन्दुमन्दहासेन चात्यायन् बहुळं तमाः ॥२६॥
भोगेच्छूनां सदाराणां यजतां श्रद्धया गुहं ।
भवन्त्यस्यैवकृप या यावेॅन्त्यःपृथिव्यां भोगाः ॥२७॥
जगत्कुटुंभी देवेशो दीनसंरक्षणक्षमः ।
पाक स्रष्टार्थं संहर्ता येः विजानन्ति ये चन ॥२८॥
येषां हि कुलजातेन स्कंदपादाश्रितेन च तरन्ति ।
वरकांभोधिं शश्वत्पुश्रेण पितरः ॥२९॥
जनानामुतदेवानां स्मृतेस्तव पदाब्जयोः ।
संप्राप्तौ भोगमोक्षा च किमश्च श्रूणि किं तपः ॥३०॥
वयमेॅतेन सततं गमिष्यामः कृतार्थ तां ।
श्रद्धया केवलेनैव यो विश्वाभिविपश्यतिः ॥३१॥
पुरा कृतान्यशेषाणि पातकानि महांति च ।
विनाश्य पालयविभो गायेत्वानमसा गिरा ॥३२॥
अनाथं दीनमापन्नं कृपाब्धे मां विलोकय ।
अचिन्तयित्वा सेनाने यन्मना दुष्कृतं कृतम् ॥३३॥
देवसेनापतिस्त्वं हि देवसे नायतो वशी ।
अतएव महासेनो भूरिदाह्यसि श्रुतः ॥३४॥

कार्तिकेय महाबाहो कृत्तिवासःप्रयंकर ।
कृत्तिवासो विभिन्नानां ह्यप्राप्यमनसा सह ॥३५॥
तां नमामि महादेवीं कार्तिकेयशु भांकणां ।
शक्तिं भद्रां भगवतीं सर्वभूतनिवेशनीम् ॥३६॥
संहृत्यविश्वं सचरा चरं च कल्पवसाने परया स्वशक्त्या ।
संक्रीडयंस्तिष्ठति गूढमूर्ति रंभस्यपारे भुवनस्य मध्ये ॥३७॥
त्वत्सन्निधानत्री जगज्जनित्री सृजत्यवत्यति च जीवसंघान् रजस्तमः ।
सत्वगुणैरजस्रं भूयिष्ठांते नम उक्तिं विधेम ॥३८॥
त्वत्समस्त्रिषु लोकेशु नान्यस्तिष्ठति निश्चितं ।
वर्णितुम्महिमानन्ते सपूर्वेनापरे जनाः ॥३९॥
त्वमेव देवदेवेश जगन्निवास कूटस्थ आत्म पुरुषः पुराणः ।
त्वमेव यत्सर्वं गतं हि वस्तुह्यागुहायां निहितोस्य जन्तोः ॥४०॥
लास्यासक्तस्य गिरिजारमणस्यांतिके चरन् ।
प्रदोषे शिवयोः प्रीतिं जनयन्रोचनादिवः ॥४१॥
तं वन्दे निष्कळं शुद्धं आदि कर्तारमीश्वरं ।
यतश्च यजुषा सार्ध मृचः सामानि जिज्ञिरे ॥४२॥
एनमाश्रित्र जित्वासन् संगरेयुद्धदुर्मदान् ।
दिवितारेति मुदिता इंद्रज्येष्ठा मरुद्गणाः ॥४३॥
यत्तद्ब्रह्म जगद्योनिः सर्वव्याप्ती सनातनः ।
सकाणस्वेच्छय शंभोरभ्राद्वृष्टिरिवाजनि ॥४४॥
त्वमन्तरात्म सर्वेभूतेषु चैकस्तथानलिप्तो खमिवाप्यचिन्त्यः ।
नित्यानित्यैश्चेतनाचेतनात्म ह्यणोरणीयान्महतो महीयान् ॥४५॥
जगत्कर्ते दिनगोप्त्रे भवहं त्रेऽसुरद्रुहां ।
कामदात्रे विश्वकर्त्रे गोत्राणां पतये नमः ॥४६॥
तस्मैकुमाराय कृपाकराय लोकैकधा त्रेऽखि लधर्मगोप्त्रे ।

द्विषड्भुजायास्तु नमः परस्मै यस्मात्परन्ना परमस्ति किंचित् ॥४७॥
तिरस्कृतानैकसहस्ररश्मिरत्नाढ्य दिव्याभरणैरुपेतं ।
माणिक्यवैडूर्यकिरीटजुष्टं विभुं चिदानन्दम रूपमद्भुतम् ॥४८॥
पुरासुपर्वाप्सरसोरगेन्द्र भूदेवसं घैरनुगीयमानः ।
त्वमेव मां भीषणमृत्युवक्त्रात्पाहि पश्चात्तादुतवा पुरस्तात् ॥४९॥
पादपंकजभृंगेभ्यो महद्भ्यश्च नमो नमः ।
तेभ्यो नमस्ते गणेभ्यो घोरेभ्योथ घोरेभ्यः ॥५०॥
तिलेषु तैलं दधिनीव सर्पिस्त्र्योतस्याश्राग्निररण्योर्यथा हि ।
तिष्ठत्यात्मा सर्वभूतेषु गूढो गर्भैइव सुधितोगर्भिणेषु ॥५१॥
त्वं भूमिरापो ज्वलनं हि वायुर्नभोदिशश्चाप्यथ चन्द्रसूर्यौ ।
मरुद्गणाश्चैव सरीसृपाश्च ह्यथो दिव्यः सुसुपर्णो गुरुत्मान् ॥५२॥
त्वय्येव हि जगजातं त्वयि सर्वं प्रतिष्ठितं ।
त्वय्येव विलयं यान्तियत्किंच जगत्यां जगत् ॥५३॥
यमेव नित्यं मुनयो यजन्ति गायन्ति गन्धर्वगणाः सुसाध्या ।
गृणन्ति चैव श्रुतयोयमाद्यमादित्यवर्णं तमसः परस्तात् ॥५४॥
यदक्षरं परमं वेदवेद्यं सर्वस्य बीजं जगतां निधानं ।
सच्चासच्चव्यापकं चित्स्वरूपमेकं सद्विप्रा बहुदा वदन्ति ॥५५॥
कलिकल्मषहन्तारं दुरितध्वान्तभास्करं ।
एनं हित्वा षाडात्मानं तेऽधंतमः प्रविशन्ति ॥५६॥
कृपाळुस्त्वादृशोनास्ति मादृशो नास्ति पापभाक् ।
पतंतंनिरयांभोदौ रक्षा राजन्नघायतः ॥५७॥
श्रियं सुविद्यां सुकळत्रमुर्वीं प्रजाः पशून् भूरियशोर्थसिद्धिं ।
प्राप्तुं यदीच्छा तव भक्तिरेव ह्ययं पन्था अनुवित्तः पुराणः ॥५८॥
स्तुतिभिर्न्नति भिर्विचिन्तनैः तवसंदर्शनकीर्तनैळल्पैः ।
सुधियोपि भजंति केवलं दीर्घायुत्वाय शतशारदाय ॥५९॥

आनंदरत्नाकर शितदीधितिं गोणौघसद्रत्न करंडमध्यगं ।
मुक्ताफलं तच्छर जन निर्मलं तस्य धीराः परिजानंति योनिं ॥६०॥
असाध्यमप्यस्य कृपाकटाक्षात्साध्यं हि लोके पवदन्ति सन्तः ।
पुरैनमाश्रित्य हि देवदेवेस्त्वष्टुर्ग्रहे अभिबत्सोममिंद्रः ॥६१॥
मध्येबहिर्वाप्यथ चान्तराळे दिक्ष्वंतरिक्षे बिलमंदिरे च ।
भूमौ तथा करतळे विदिक्षु नहीन्वस्यप्रतिमानमस्ति ॥६२॥
यद्ब्रह्म यच्छाक्षरमद्वितीयमनौपमं वाङ्मनसोविदूरं ।
यदेतदव्यक्त मतींद्रियं तत्वरमं पदमवभाति भूरि ॥६३॥
यस्यचित्तं त्वत्पदाब्जे सततं निश्चलं विभो ।
नाप्राप्यमस्ति सुधियस्तस्य देवा असन्वशे ॥६४॥
नौमि सदार्थधातरं गोप्तारं त्रिदिवौकसां ।
हन्तारं सर्वशत्रूणां जेतारमपराजितम् ॥६५॥
यद्विदित्वापरं चान्यत् ज्ञातव्यं नहि किंचन ।
इति शुश्रुमधीराणां येनस्त्वद्विचचक्षिरे ॥६६॥
त्वमेव वे द्योसि समाधिनिष्ठैःत्वमेव चेजोपि तथाध्वरेषु ।
त्वमेवपूज्योसि समस्त नीर्जरैस्त्वंब्रह्मारयिविद्ब्रह्मणस्पते ॥६७॥
अग्निर्यथैकोभुवनं प्रविष्टो रूपं रूपं प्रति रूपो बहिश्च ॥६८॥
सूर्यो यथा सर्वभूतेषु चक्षुर्नलिप्यते चाक्षुषैर्बाह्य दोषैः ।
एकस्तथा सर्वभूदांतरात्ममलिप्य ते चाक्षुषैर्बाह्यदोषैः ॥६९॥
एकोवशि सर्वभूतांतरात्म चै कं रूपं बहुधा यः करोती तमात्मस्थंयेनु
पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥७०॥
सुकाम दोग्ध्रीह्यमृतप्रवर्षणी भवत्कृपायाश्रित कामरूपिणी ।
अस्मासु नित्यं सकलार्थदायिनी सा वर्धतां महते सौभगाय ॥७१॥
स एवमागयणसन्निकृष्टः शरीरूवस्थाय करोति सर्वं ।
स सर्व भूतेन्द्रिय संहतिस्थः ससर्वज्ञः सर्वमिदं प्रपश्यति ॥७२॥

त्वदाश्रया महामया सैव विश्वं मिनिर्ममे ।
ततोन्यत्परमाणुर्वा नेह त्वानास्ति किंचन ॥७३॥
त्वमन्तरात्म पंचमिशात्परश्च त्वामुत्तमः पुरुष परमात्माह्म भिन्नः ।
सनातनः प्रेर्यमाण एको देवः सर्वभूतेषु गूढः ॥७४॥
यदादित्ये यच्छशांके यदग्नौयद्व्योम्नि भूमौयच्छवसनेयदप्सु ।
यद्यजमाने निष्ठितं सर्वगु यत् य इत्तद्विदुस्त इमे समासते ॥७५॥
स्वेच्छया क्रीडमानस्सन्व्या प्यातिष्ठति सर्वगु ।
साक्षीप्रकृत्या स्ंयुक्तो भर्गो देवस्य धीमहि ॥७६॥
स्तोतुं स एव सर्वात्मादष्टुं ज्ञातुं तदर्चनं ।
कर्तुं सज्जन संसर्गं धियोयोनः प्रचोदयात् ॥७७॥
ऋच्मंडलं यद्यजूंगंषि प्रतीकं सा मान्युस्राभ्रान्तितमोनिहन्तां ।
विभ्राड्बृहत्तत्परमार्थरूप मादित्यवर्णं तमसः परस्तात् ॥७८॥
सुतेजस्र कृष्ण शुक्ला ह्यनेक भेदान्माय जीव संघाननेकान् ।
त्वदाधारा तृत्प्रति बिंबितासती यदक्षरं पन्चविदं समेति ॥७९॥
यदक्षरं पंचामृतं ब्रह्मवेद्यं छंदोमयास्यं प्रणौमि द्वादशारं । सप्तचक्रं वियति
भ्राम्यमाणमेकं संतं बहुदा कल्पयन्ति ॥८०॥
सूते जनानामखिलार्थसिद्धिं या स्कंद शक्ति कृपया मनोज्ञा ।
अभाति सा कल्पलतेवे शश्वत् प्रियं सखायं परिषस्वजाना ॥८१॥
तां देवसेनां तरुणार्कभासां कुंदेंदु मन्दस्मितशोभिवक्त्रां ।
स्मरामि नित्यं कनकाभगात्रां वचोविदं वाचमुदीरयन्तीम् ॥८२॥
पुरा महत्माभगवान्घटोद्भवः स्तोत्रेण संसुत्य षडास्यमादरात् ।
भूत्वा मुनीनां प्रवरः समाहितश्चि कितुषी प्रथमा यज्ञियानाम् ॥८३॥
विद्यावित्तं यशस्वर्गरोक्षौचायूषिनः सदा ।
विजयं देहि सेनानेस्त वामत्वास्वाध्यः ॥८४॥

त्वया संप्रेर्यमाणोहभक्त्या स्तौमि हरात्मज ।
पाहिनः कृपया देव सेनानिभ्यश्च वो नमः ॥८५॥
दुःस्वप्न दुर्निमित्तोत्थभयं शमय शांकरेत्वं ।
हि पक्षिमुखाच्चापि भद्रन्नःसर्वतो वद ॥८६॥
निहत्य तारकं संख्येसपुत्रामात्यभान्दवं ।
कुमारशैलशृंगाग्रं अरोहन्नुत्तरां दिवं ॥८७॥
भवामयनिहन्तापि कुष्ठरोगातुरां स्तथा ।
रक्षिष्यसीतिश्रुणमो हरिमाणं च नाशय ॥८८॥
यत्रोच्छिष्टानुलेपेन पादसंघैर्नलिप्यते ।
सुब्रमण्यस्य महिमाकस्तद्वेदद्भुतम् ॥८९॥
सर्वेशमाश्रित्य तथान्नमुत्तमं जीवन्ति जीवा इतिदानलीलया ।
धातुः फलं बह्वितिदर्शयन्नसावधारयद्धरितोभोजनं ॥९०॥
दारापगोपान्त कुमारभूभृतिस्थित्वान्नदानं प्रकरोति सन्ततं ।
आज्ञापितं तेन गुहेन चैवं केवलाघो भवति केवलादी ॥९१॥
विशोषणाय दैत्येन्द्र महाप्रळयवारिधेः ।
निर्य्याहीत्य ब्रुवन् देवा जयतामिवदुन्दुभिः ॥९२॥
आम्नाय पादप्रहितेन संस्तुतः स्तवेनचानेनहुताशभूर्गुहः ।
तुष्ट सदा दैवत दैवतः स्वयवंस्मभ्यं तद्धत्तनयद्वयीमहे ॥९३॥
इमं स्तवमधीयानः स्कन्दभक्तियुतोवशी ।
प्राप्येह सकलान्कामान् घोरमृत्यु भयं हे ॥९४॥
॥ स्वस्ति श्री स्कंद वेदपाद स्तोत्रम् ॥

B.N. Shrinath Udupa -
TRIPURASHRI #2/217 -
Karikallkatte - Japthi Post Kundapur TQ - Udupi DT 576211
Email:-shrinath.udupa@gmail.com - Cell : +91-9740069904